# Yamaproktam Pradoshakalelingapujamahimavarnanam

# યમપ્રોક્તં પ્રદોષકાલેલિઙ્ગપૂજામહિમવર્ણનમ્

## Document Information

Text title : Yamaproktam Pradoshakalelingapujamahimavarnanam

File name : pradoShakAlelingapUjAmahimavarNanam.itx

Category : shiva, shivarahasya, pUjA

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 3 | 50-75 ||

Latest update : January 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

February 1, 2024

*sanskritdocuments.org*

# યમપ્રોક્તં પ્રદોષકાલેલિઙ્ગપૂજામહિમવર્ણનમ્

પ્રદોષે લિઙ્ગપૂજાયાં દૃષ્ટાયાં પાપસઙ્ક્ષયઃ ।
અક્ષયા મોક્ષલક્ષ્મીશ્ચ ભવિષ્યત્યધમસ્ય ચ ॥ ૫૦॥

જન્મ તસ્યૈવ સફલં યેન સમ્યક્ સમર્ચિતમ્ ।
સાયં સુકૃદયત્નેન આલસ્યાદ્વા પ્રયત્નતઃ ॥ ૫૧॥

આયાસમાત્રફલકૈઃ ધર્માભાસૈઃ કુતઃ ફલમ્ ।
સ્માર્તૈર્વા વૈદિકૈર્વાઽપિ શિવલિઙ્ગાર્ચનં વિના ॥ ૫૨॥

સ્માર્તવૈદિકધર્માણાં અનુષ્ઠાનેઽપિ કોટિશઃ ।
લિઙ્ગાર્ચનેન યત્ પ્રાપ્યં તત્ પ્રાપ્યં તૈર્ન સર્વથા ॥ ૫૩॥

ધર્માન્તરાણાં કરણં ધનનાશાય કેવલમ્ ।
શિવાર્ચનં પરો ધર્મઃ પરમાનન્દસાધનમ્ ॥ ૫૪॥

પાપરાશિવિનાશાય શિવલિઙ્ગાવલોકનમ્ ।
કલ્પિતં ગિરિશેનેતિ ન જાનાત્યેવ નારકી ॥ ૫૫॥

લોકોપકારકં સૃષ્ટં શિવલિઙ્ગાવલોકનમ્ ।
તન્ન કુર્વન્તિ પાપિષ્ઠાઃ પતન્તિ નરકેષ્વહો ॥ ૫૬॥

અનાથનાથં શ્રીનાથનયનાર્ચિતપાદુકમ્ ।
ન જાનન્તિ મહાદેવં નરકેષુ પતન્ત્યહો ॥ ૫૭॥

શ્રીમહાદેવમહિમા દુર્જ્ઞેયો દુર્જનૈરતઃ ।
પતન્તિ નરકે ઘોરે પિતૃભિઃ સહ સર્વથા ॥ ૫૮॥

પિતાપિતામહાદીનાં યઃ શમ્ભુર્યો ભવઃ પ્રભુઃ ।
તં ન જાનન્તિ દુર્વૃત્તાઃ પતન્તિ નરકેષ્વહો ॥ ૫૯॥

શિવધર્મેષ્વવિશ્વાસાદન્યધર્મરતા નરાઃ ।
પતન્તિ નરકે ક્રૂરા નરાઃ શઙ્કરનિન્દકાઃ ॥ ૬૦॥

તદર્થં નરકાઃ સૃષ્ટાઃ સર્વથા દુઃખહેતવઃ ।
યૈર્મહાદેવલિઙ્ગાર્ચાફલં ન જ્ઞાતમાદરાત્ ॥ ૬૧॥

ન જાનાતિ મહાદેવલિઙ્ગપૂજાફલાનિ યઃ ।
સ સૂકરઃ ખરો યદ્વા શુનકઃ કાક એવ વા ॥ ૬૨॥

દુર્ભગા એવ તે સર્વે ભર્ગાર્ચનપરાઙ્મુખાઃ ।
તન્મુખાનિ પ્રદગ્ધાનિ શિવદ્વેષાગ્નિકોટિભિઃ ॥ ૬૩॥

સુલભં ન વિજાનન્તિ મહાદેવાર્ચનં જનાઃ ।
શુદ્ધદૂર્વાઙ્કુરેણાપિ લિઙ્ગપૂજા વિમુક્તિદા ॥ ૬૪॥

ક્ષીરં વા નીરમુત્સૃજ્ય ભક્ત્યા લિઙ્ગે શિવાત્મકે ।
વિધૂતપાતકા એવ પ્રયાન્તિ શિવમવ્યયમ્ ॥ ૬૫॥

શુષ્કેણ બિલ્વપત્રેણ તચ્ચૂર્ણેનાપિ યઃ શિવમ્ ।
પૂજયિષ્યતિ તસ્યાપિ મુક્તિકાન્તા ન દુર્લભા ॥ ૬૬॥

વ્યાસઙ્ગેનાપિ યઃ શાઙ્ગં લિઙ્ગં મઙ્ગલદાયકમ્ ।
સાયં પશ્યતિ પુણ્યાત્મા નમસ્તસ્મૈ નમો નમઃ ॥ ૬૭॥

અનારાધ્ય મહાદેવમનાયાસેન પાપિનઃ ।
પ્રયાન્તિ દુર્ગમં ઘોરં નરકાલયમન્વહમ્ ॥ ૬૮॥

બને વનાનિ રમ્યાણિ વનજાન્યપિ તૈઃ શિવઃ ।
નારાધ્યતે દુર્ભાગેન નરકાવાસમિચ્છતા ॥ ૬૯॥

અનિચ્છયાપ્યુમાકાન્તં લિઙ્ગં પશ્યતિ યો નરઃ ।
સાયં સ દોષનિર્મુક્તો મુક્તો ભવતિ નાન્યથા ॥ ૭૦॥

તૃણૈરપિ શિવં મૂર્ખાઃ કથં નારાધયન્ત્યહો ।
મહાદેવં મહામોહો મહાનરકસાધનમ્ ॥ ૭૧॥

શિવલિઙ્ગાર્ચકાઙ્ગાનિ દૃષ્ટ્વાઽપિ રજનીમુખે ।
પ્રયાન્તિ બ્રહ્મસદનં તલ્લીલાઽત્યન્તમદ્ભુતા ॥ ૭૨॥

સુભગત્વેન વિજ્ઞાતં શાઙ્ગાઙ્ગસ્ય વિલોકનમ્ ।
તદભાગ્યાગ્નિદગ્ધાનાં અતિદુર્લભમેવ હિ ॥ ૭૩॥

લિઙ્ગાર્ચનેન કિં પુણ્યમિત્યુપેક્ષાપિ ચેત્ ક્ષણમ્ ।
તદ્વંશક્ષય એવ સ્યાત્ પક્ષપાતેન નોચ્યતે ॥ ૭૪॥

અહો મહદિદં ભાગ્યં શિવલિઙ્ગાર્ચને મતિઃ ।
તદેવ હિ મહદ્ભાગ્યં મહાભાગ્યમિતિ શ્રુતમ્ ॥ ૭૫॥

લોકે દુરાચારરતાઃ શિવાર્ચાં વિહાય તિષ્ઠન્ત્યતિવિક્ષયા તે ।
લિપ્તા ભવિષ્યન્તિ ન સંશયોઽત્ર શિવાપદામ્ભોજયુગે શપામિ ॥ ૭૬॥

યઃ કર્મણા વા મનસાઽપિ વાગ્મી નિત્યં ત્રિભિર્વા ત્રિપુરાન્તકાર્ચામ્ ।
કરોતિ તત્પાદરજઃપ્રસાદં વાઞ્છત્યુપેન્દ્રોઽપિ ચતુર્મુખોઽપિ ॥ ૭૭॥

કિં વક્તવ્યમુમાસહાયચરણામ્ભોજાર્ચકારાધકા-
પારૈશ્વર્યપરં હરિઃ પ્રતિદિનં તત્સેવકારાધકઃ ।
શ્રીવાણીરમણાદયોઽપિ મુનયઃ સિદ્ધાઃ સુમુગ્ધાસ્તતો
ગન્ધર્વા અપિ કિન્નરા અપિ તથા શેષાદયઃ સેવકાઃ ॥ ૭૮॥

શમ્ભુસ્સર્વજગત્પ્રભુર્વિભુરિતિ જ્ઞાત્વા પરં શામ્ભવાઃ
તત્પૂજાનિરતાઃ પરાત્ પરતરં તેજઃ પરં શામ્ભવમ્ ।
પ્રાપ્યાન્તે પરમોત્સવાદૃતનિજવ્યાપારપારઙ્ગતાઃ
પારાવારવિહારપૂજિતપદામ્ભોજાઃ પ્રસન્નાઃ સદા ॥ ૭૯॥

કસ્તૂરીમૃગરાજરાજસહિતઃ કર્પૂરગન્ધો યથા
ન જ્ઞાતઃ શુનકૈસ્તથા શિવશિવાચારવ્રતાનાદરૈઃ ।
ન જ્ઞાતં શિવલિઙ્ગપૂજનફલં તત્કાલકાલાર્ચકૈઃ
જ્ઞેયં કેવલમિત્યલૌકિકમિદં જ્ઞેયં કથં પામરૈઃ ॥ ૮૦॥

કિમન્યદ્વક્તવ્યં સ્મરહરકથાસઙ્ગસરસો
ન વિજ્ઞાતો લોકરમિતમહિમા તેન સહસા ।
ન બુદ્ધિર્મન્દાનાં શિવચરણસેવાનુકરણે
ક્ષણં વા ન ક્ષીણં યદિ મરણકાલેઽપ્યઘકુલમ્ ॥ ૮૧॥

બલાદેતે લોકાઃ ખલજનરતા એવ નિતરાં
ન જાનન્ત્યેવાલં બત બત ન કાલાન્તકમતં
અતોઽન્તે સન્તપ્તાઃ પ્રતિપદમહાઘોરનરકે-
ષ્વસન્તોષે દોષપ્રલયનવિષાદેતિ સ વિષમ્ ॥ ૮૨॥

અહો મોહઃ કોવા જગતિ ન મહાદેવભજને
મતિર્ભક્તિઃ શ્રદ્ધા કથમપિ ન તત્પૂજનરતિઃ ।

ન તદ્ભક્તાલાપેપ્યભિરુચિરતો યાન્તિ નરકે-
ષ્વઘોરેષુ ભ્રષ્ટાઃ શિવરુચિરમાર્ગાદિતિ શઠાઃ ॥ ૮૩॥

લલાટે કિઞ્ચિદ્વા સિતભસિતમાલિપ્ય શિરસા
મુહુર્નત્વા યદ્વા સકૃદપિ સુરુદ્રાક્ષવપુષા ।
શિવં દૃષ્ટ્વા સાયં જલમપિ વિનિક્ષિપ્ય વિમલં
કલૌ લિઙ્ગેશ શિવપદસરોજે પ્રવિશતિ ॥ ૮૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે યમપ્રોક્તં પ્રદોષકાલેલિઙ્ગપૂજામહિમવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૩
- યમસદસ્યસંવાદે પ્રદોષકાલદીપદર્શનપૂજામહિમવર્ણનમ્ । ૫૦-૭૫॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 3
- yamasadasyasaMvAde pradoShakAladIpadarshanapUjAmahimavarNanam . 50-75..

Proofread by Ruma Dewan

---

*Yamaproktam Pradoshakalelingapujamahimavarnanam*

pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*